# .. Mahishigita from Shrimadbhagavatam ..

# ॥ શ્રીમદ્ભાગવતાન્તર્ગતમ્ મહિશીગીતમ્ ॥

## Document Information

```
Text title : shrimadbhAgavatAntargataM mahishigIta
File name : mahishIgIta.itx
Category : gItam
Location : doc_giitaa
Author : maharShi vyAsa
Language : Sanskrit
Subject : philosophy/hinduism/religion
Description-comments : Bhagavatam skanda 10 adhyAya 90
Latest update : November 10, 2012
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીમદ્ભાગવતાન્તર્ગતમ્ મહિશીગીતમ્ ॥

મહિષ્ય ઊચુઃ ।
કુરરિ વિલપસિ ત્વં વીતનિદ્રા ન શેષે
સ્વપિતિ જગતિ રાત્ર્યામીશ્વરો ગુપ્તબોધઃ ।
વયમિવ સખિ કચ્ચિદ્ગાઢનિર્વિદ્ધચેતા
નલિનનયનહાસોદારલીલેક્ષિતેન ॥ ૧૦.૯૦.૧૫॥

નેત્રે નિમીલયસિ નક્તમદૃષ્ટબન્ધુસ્
ત્વં રોરવીષિ કરુણં બત ચક્રવાકિ ।
દાસ્યં ગત વયમિવાચ્યુતપાદજુષ્ટાં
કિં વા સ્રજં સ્પૃહયસે કવરેણ વોઢુમ્ ॥ ૧૦.૯૦.૧૬॥

ભો ભોઃ સદા નિષ્ટનસે ઉદન્વન્નલબ્ધનિદ્રોઽધિગતપ્રજાગરઃ ।
કિમ્વા મુકુન્દાપહૃતાત્મલાઞ્છનઃ પ્રાપ્તાં દશાં ત્વં ચ
ગતો દુરત્યયામ્ ॥ ૧૦.૯૦.૧૭॥

ત્વં યક્ષ્મણા બલવતાસિ ગૃહીત ઇન્દો
ક્ષીણસ્તમો ન નિજદીધિતિભિઃ ક્ષિણોષિ ।
કચ્ચિન્મુકુન્દગદિતાનિ યથા વયં ત્વં
વિસ્મૃત્ય ભોઃ સ્થગિતગીરુપલક્ષ્યસે નઃ ॥ ૧૦.૯૦.૧૮॥

કિં ન્વાચરિતમસ્માભિર્મલયાનિલ તેઽપ્રિયમ્ ।
ગોવિન્દાપાઙ્ગનિર્ભિન્ને હૃદીરયસિ નઃ સ્મરમ્ ॥ ૧૦.૯૦.૧૯॥

મેઘ શ્રીમંસ્ત્વમસિ દયિતો યાદવેન્દ્રસ્ય નૂનં
શ્રીવત્સાઙ્કં વયમિવ ભવાન્ધ્યાયતિ પ્રેમબદ્ધઃ ।
અત્યુત્કણ્ઠઃ શવલહૃદયોઽસ્મદ્વિધો બાષ્પધારાઃ
સ્મૃત્વા સ્મૃત્વા વિસૃજસિ મુહુર્દુઃખદસ્તત્પ્રસઙ્ગઃ ॥ ૧૦.૯૦.૨૦॥

પ્રિયરાવપદાનિ ભાષસે મૃતસઞ્જીવિકયાનયા ગિરા ।
કરવાણિ કિમદ્ય તે પ્રિયં વદ મે વલ્ગિતકણ્ઠ કોકિલ ॥ ૧૦.૯૦.૨૧॥

ન ચલસિ ન વદસ્યુદારબુદ્ધે ક્ષિતિધર ચિન્તયસે મહાન્તમર્થમ્ ।
અપિ બત વસુદેવનન્દનાઙ્ઘ્રિં વયમિવ કામયસે સ્તનૈર્વિધર્તુમ્ ॥ ૧૦.૯૦.૨૨॥

શુષ્યદ્ધ્રદાઃ કરશિતા બત સિન્ધુપત્ન્યઃ
સમ્પ્રત્યપાસ્તકમલશ્રિય ઇષ્ટભર્તુઃ ।
યદ્વદ્વયં મધુપતેઃ પ્રણયાવલોકં
અપ્રાપ્ય મુષ્ટહૃદયાઃ પુરુકર્શિતાઃ સ્મ ॥ ૧૦.૯૦.૨૩॥

હંસ સ્વાગતમાસ્યતાં પિબ પયો બ્રૂહ્યઙ્ગ શૌરેઃ કથાં
દૂતં ત્વાં નુ વિદામ કચ્ચિદજિતઃ સ્વસ્ત્યાસ્ત ઉક્તં પુરા ।
કિં વા નશ્ચલસૌહૃદઃ સ્મરતિ તં કસ્માદ્ભજામો વયં
ક્ષૌદ્રાલાપય કામદં શ્રિયમૃતે સૈવૈકનિષ્ઠા સ્ત્રિયામ્ ॥ ૧૦.૯૦.૨૪॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે વૈયાસિક્યામષ્ટાદશસાહસ્ર્યાં
પારમહંસ્યાં સંહિતાયાં દશમસ્કન્ધે ઉત્તરાર્ધે
શ્રીકૃષ્ણચરિતાનુવર્ણનં નામ નવતિતમોઽધ્યાયાન્તર્ગતં
મહિશીગીતં સમાપ્તમ્ ॥ ૧૦.૯૦॥

Bhagavavatam skandha 10 adhyAya 90

.. Mahishigita from Shrimadbhagavatam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*